**आकाशवाणी**

**दिनाङ्कः-13.04.2025** **सायम् - 06:20**

**मुख्यवार्ताः**

- केंद्रीयमत्रिणा नितिन गडकरी इत्यनेन उक्तं प्रशासनम् आगामिनं वर्षद्वयं यावत् देशस्य राजमार्गाणां स्थितिं सुदृढयितुं दशलक्ष-कोटिरुप्यकाणां निवेशार्थं योजनां निर्माति। अत्र पूर्वोत्तरक्षेत्रेषु अथ सीमवर्ति-क्षेत्रेषु विशेषतया ध्यानं प्रदास्यते।
- प्रधानमंत्री नरेंद्रमोदी श्वः अंबेडकर-जयंत्यवसरे हरियाणाराज्ये अनेकासां परियोजनानां शुभारंभं करिष्यति।
- केन्द्रं पश्चिमबंगालस्य मुर्शिदाबादजनपदे जातां हिंसां निध्याय स्थितिम् अवलोकयति। तत्र स्थितिः चिन्तापूर्णा अस्ति परं नियन्त्रणे वर्तते।
- सम्पूर्णे अपि भारते पारंपरिक-सस्योत्सवः हर्षोल्लासेन आचर्यमाणः अस्ति।
- राजस्वगुप्तचरनिदेशालयेन मिजोरमस्य बहिःस्थलस्य समीपे मेथम-फेटामाइन् इति प्रायः द्विपञ्चाशत् कोटितोप्यधिक मूल्यात्मकस्य मादकपदार्थाः निगडिताः।

**नितिनगडकरी**

प्रशासनम् आगामिनं वर्षद्वयं यावत् देशस्य राजमार्गाणां स्थितिं सुदृढयितुं दशलक्ष-कोटिरुप्यकाणां निवेशार्थं योजनां निर्माति। अत्र पूर्वोत्तरक्षेत्रेषु अथ सीमवर्ति-क्षेत्रेषु विशेषतया ध्यानं प्रदास्यते। एकेन वार्ताभिकरणेन समं प्रकाशिते साक्षात्कारे पथपरिवहन-राजमार्गमंत्री नितिनगडकरी इत्येषः उक्तवान् यत् केंद्रम् आगामिने वर्षद्वये देशस्य आधारभूतसंरचनासु परिवर्तनाय कार्यं करोति, येन अस्माकं देशस्य राजमार्गाः संयुक्तराज्यामेरिकादेशस्य मार्गसमानाः भवेयुः। श्री गडकरीः कथितवान् यत् पूर्वोत्तरक्षेत्रेषु त्वरितप्रभावेण मार्गाणां दृढीकरणस्य आवश्यकता अस्ति, यतोहि पूर्वोत्तरस्य क्षेत्राणि समस्यायुतानि सन्ति अथ अनेकेषां देशानां सीमाः एतैः सह संयुक्ताः भवन्ति। पथपरिवहनमन्त्री कथितवान् यत् पूर्वोत्तर-राज्येषु चतुर्-अशीत्यधिक-सप्तशतं राजमार्गपरियोजनानां निर्माणं भविष्यति, या हि खलु भूयोपि त्रिशताधिक-एकविंशति-सहस्र-किलोमीटर-मिताः सुदीर्घाः भविष्यन्ति। श्री गडकरीः एतदपि सूचितवान् यत् नागपुरे महत्त्वपूर्णाः तीव्रपरिवहन-परियोजनाः प्रचाल्यमानाः सन्ति। एतासु पञ्चत्रिंशत्-अधिकैकशत-आसन-समन्वितानि प्रदूषणरहितोर्जा-स्रोतोभिः सञ्चाल्यमानानि बसयानानि सम्मिलितानि सन्ति।

**प्रधानमंत्री-परियोजना-कार्याणि**

प्रधानमंत्री नरेंद्रमोदी श्वः अंबेडकर-जयंत्यवसरे हरियाणाराज्ये अनेकासां परियोजनानां शुभारंभं करिष्यति। तावत् प्रधानमंत्री हिसारस्थलात् अयोध्यानगराय वाणिज्यिक-उड्डयनार्थं हरितध्वजं प्रदर्शयिष्यति, सममेव असौ हिसारविमान-पत्तन-स्थले नवस्थलीय-भवनस्य निर्माणाय आधारशिलाम् अपि स्थापयिष्यति। तत्रैव यमुनानगरे प्रधानमंत्री "दीनबंधु- छोटू-राम-थर्मल-पावर-प्लांट" इत्येतस्य संयन्त्रस्य विद्युत्-एकांशस्य, भारतमाला-परियोजनायाः अन्तर्गतं चतुर्दश-किलोमीटरमितात् अपि अधिक सुदीर्घां रेवाड़ी-मार्ग-परियोजनां समेत्य भूयोपि एकसहस्र-कोटि-मुद्रायाः विकास-परियोजनानाम् उद्घाटनं शिलान्यासं च करिष्यति।

**बाबासाहेब डॉ. भीमराव अंबेडकर जयंती**

भारतीयसंविधानस्य निर्माता बाबासाहेब डॉ. भीमराव अंबेडकरवर्यस्य पञ्चत्रिंशत्-अधिकैक-शततमीं जयंतीम् उपलक्ष्य श्वः नवदिल्ल्यां संसद्भवनस्य प्राङ्गणे स्थिते प्रेरणास्थले एकः समारोहः आयोजयिष्यते। कार्यक्रमस्य समारम्भे राष्ट्रपतिपदासीना द्रौपदी मुर्मूः, उपराष्ट्रपतिः जगदीप धनखड़वर्यः, प्रधानमंत्री नरेंद्र मोदी, लोकसभायाः अध्यक्ष ओम बिरलाः, केंद्रीयमंत्रिणः, सांसदाः अथ अन्ये प्रतिष्ठिताः गणमान्याः बाबासाहेबभीमराव-अंबेडकरवर्यस्य प्रतिमायां पुष्पांजलिम् अर्पयिष्यन्ति। श्रद्धांजलिसमर्पणानन्तरम् एषः कार्यक्रमः मध्याह्नं द्वादशवादनं यावत् सामान्यजनेभ्यः उद्घाटितः भविष्यति। तावत् अंबेडकरवर्याय श्रद्धांजलि-प्रदानकर्तृभ्यः सुविधां प्रदातुं , डॉ. अंबेडकर फाउंडेशन इत्याख्येन संस्थानेन विशेष-प्रबन्धाः प्रकल्पिताः सन्ति। एतदनु अम्बेडरकर-वर्याय श्रद्धांजलिं प्रदातुं राष्ट्रीय-स्मारकं यावत् जनाः प्राप्नुवन्तु, तदर्थं DAF-इत्याख्येन संस्थानेन विशेषतया बससेवायाः व्यवस्था अपि कृता अस्ति।

**बिहार-मण्डाविया**

केन्द्रीय-युव-प्रकरण-क्रीडामन्त्री डॉ. मनसुख मण्डाविया इत्यमुना विकसितभारतस्य निर्माणाय डॉ. भीमराव अम्बेडकर-वर्यस्य समानतायाः, न्यायस्य, भ्रातृत्वस्य च दृष्टिकोणेभ्यः प्रेरणाम् आदाय यूनाम् आह्वानं कृतम्। डॉ. मण्डाविया मन्त्रालयेन आयोजितस्य जयभीमयात्राम् हरित-ध्वजप्रदर्शनात् पूर्वं पटनानगरस्य ऐतिहासिके गान्धीउद्याने मम भारतस्य यूनः स्वयंसेवकान् च सम्बोधयन् आसीत्। सः अवदत् यत् देशस्य युवानः भारतीयसंविधानस्य भावानाम् आदरं कुर्वन्तु, तेषां पालनं च अवश्यमेव कुर्वन्तु इति। डॉ. मण्डाविया इत्यनेन प्रधानमन्त्रिणा नरेन्द्र मोदिना प्रदत्तस्य पंच प्रणानां (पंच प्रण) अनुसरणाय यूनाम् आग्रह: कृतः।

पदयात्रा प्रतिष्ठित-गान्धी-उद्यानात् आरभ्य पटनानगरस्य विभिन्नेषु भागेषु सम्भूय उच्चन्यायालयस्य समीपम् डॉ. अम्बेडकरस्य प्रतिमायाः पार्श्वे पूर्णा जाता। अस्मिन् अवसरे स्वच्छता-अभियानं, डॉ. अम्बेडकर-वर्यस्य प्रतिमायाः माल्यार्पणं च अभवत् । कार्यक्रमे **माई भारत एण्ड यंग अचीवर्स** इत्येतस्य अनेकाः स्वयंसेवकाः, राज्यमन्त्रिणः, सांसदाः, विधायकाः, राजनेतारः च उपस्थिताः आसन् । अद्य देशे पञ्चसहस्रतोप्यधिकेषु स्थानेषु जय भीमपदयात्रायाः आयोजनं क्रियते।

**दिल्ली-पदयात्रा**

दिल्ली-सर्वकारेण अद्य राष्ट्रियराजधान्यां डॉ भीमराव अम्बेडकर-जयन्ती-दिवसस्य निमित्तं पदयात्रायाः आयोजनं कृतम्। मुख्यमन्त्री रेखागुप्ता पदयात्रां हरितध्वजं प्रदर्शितवती। यस्याम् सहस्रं यावत् बालकाः भागं गृहीतवन्तः। आयोजने सा प्रोक्तवती यत् दिल्लीसर्वकारः डॉ आंबेडकर वर्येण प्रदर्शित-मार्गम् अनुसर्तुम् समर्पितः अस्ति।

**बैसाखी**

सम्पूर्णे अपि भारते पारंपरिक-सस्योत्सवः हर्षोल्लासेन आचर्यमाणः अस्ति। तावत् पंजाबप्रान्ते बैसाखी, केरलराज्ये विशुः, पश्चिमबंगाले पोइला बोइशाखः असमराज्ये बोहागः उत बिहू इत्येषः अथ तमिलनाडुराज्ये पुथांडू इत्येषः महता उल्लासेन परिपाल्यन्ते। अवधेयं यत् बैसाखीति पर्व गुरुगोविंद-सिंहद्वारा खालसापंथस्य स्थापनायाः प्रतीकपर्वत्वेन अपि परिपाल्यते। दिनमिदम् उपलक्ष्य राष्ट्रपतिपदासीना द्रौपदी मुर्मूः, उपराष्ट्रपतिः जगदीप धनखड़वर्यः, प्रधानमंत्री नरेंद्र मोदी च देशवासिभ्यः तशुभकामनाः प्रदत्तवन्तः अथ जलियांवालाबागप्रकरणे वीरतां गतेभ्यः श्रद्धांजलिम् अपि अर्पितवन्तः। राष्ट्रपतिना कथितं यत् जलियांवालाबाग-प्रकरणे वीरतां गतानां बलिदानेन भारतस्य स्वतंत्रतासंग्रामः इतोपि संवर्धितः। तावत् उपराष्ट्रपतिः धनखड़वर्यः दिनमिदं साहसप्रतीकत्वेन प्रतिपादितम्। तत्रैव प्रधानमन्त्री मोदी कथितवान् यत् भविष्ये अस्माकं वंशजाः तेषाम् अदम्यसाहसं सम्मानयिष्यन्ते।

**पश्चिम-बङ्गाल**

पश्चिम-बङ्गालस्य मुर्शिदाबाद-जनपदे जातां हिंसां निध्याय केंद्रीयः गृहसचिवः गोविंद-मोहनः अद्य पश्चिम-बङ्गालस्य मुख्य-सचिवेन आरक्षिमहानिदेशकेन च साकम् वीडियो कॉन्फ्रेंस इति दृश्यश्रव्यपरान्तर्जाल-माध्यमेन संवादम् अकरोत्। पश्चिम-बंगालस्य आरकक्षिमहानिदेशकेन प्रोक्तं यत् स्थितिः चिन्तापूर्णा तु अस्ति परं नियन्त्रणे वर्तते। अमुनोक्तं यत् सततं निरीक्षणं विधीयते। अपि च उक्तं यत् सर्धैकशताधिकाः जनाः निगडिताः स्थानीयस्तरे संयुक्तेन सीमसुरक्षाबलेन साहाय्यं स्वीक्रियते। केन्द्रीयरक्षितारक्षिबलस्य रांची, जमशेदपुर राजरहाट चेत्येषां पञ्चसैन्यदलानि पश्चिम-बङ्गालस्य मुर्शिदाबाद-जनपदस्य हिंसा-प्रभावित-क्षेत्रेषु समुपस्थातुम् प्रोक्तानि। दक्षिणी बंगालेन संबद्धेन सीम-सुरक्षा-बलस्य आरक्षि- महानिरीक्षकेन करणी-सिंह-शेखावतेन राज्यस्य वरिष्ठारक्षि अधिकारिभिः सह उपवेशनं विहितम्।

**मिजोरम**

राजस्वगुप्तचरनिदेशालयेन डी.आर.आई. इत्यनेन मिजोरमस्य बहिःस्थलस्य समीपे पञ्च द्वि दशमलव षड् सप्त किलोग्राम मितं यावत् मेथमफेटामाइन् इति प्रायः द्विपञ्चाशत् कोटितोप्यधिक मूल्यात्मकस्य मादकपदार्था: निगडिता: तथा च द्वौ जनौ अप्रैल एकादश दिनाङ्के गृहीतौ इति वित्तमन्त्रालयेन अद्य उक्तम्।

**आई. पी. एल.**

आई.पी.एल. इत्याख्यायां क्रिकेट् क्रीडामालिकायाम् जयपुरनगरस्य सवाई-मानसिंह क्रिकेट क्रीडाङ्गणे राजस्थान रॉयल्स-रॉयल चैलेंजर्स बेंगलुरू दलयोर्मध्ये द्वन्द्वं सम्प्रति प्रचलति। अन्तिम सूचनाया: प्राप्तिं यावत् राजस्थान रॉयल्स दलेन ........................ धावनांका: विरचिता: ।

तत्रैव दिनस्य द्वितीयं द्वद्वं दिल्ल्या: अरूण-जेटली क्रीडाङ्गणे दिल्ली कैपिटल्स-मुंबई इंडियंस दलयो: मध्ये सार्धसप्त वादने भविष्यति।

**।। इति वार्ता: ।।**